॥अथगंगासहस्त्रनामस्तोत्रप्रारंभः॥

गं·स
१

श्रीगणेशायनमः॥ अगस्त्यउवाच विनास्ना
नेनगंगायांनृणांजन्मनिरर्थकं उपायांतरमस्त्य
न्यचेनस्नानफलंलभेत् १ अशक्तानांचपंगू
नामालस्योपहतात्मनां दूरदेशांतरस्थानांगं
गास्नानंकथंभवेत् २ दानंवाथव्रतंवाथमंत्र
स्तोत्रजपोथवा तीर्थांतराभिषेकोवादेवतोपा
सनंतुवा ३ यद्यस्तिकिंचित्षड्वक्त्रगंगास्नान १
फलप्रदं विधानांतरमन्त्रेशतद्वदप्रणतायमे ४

त्वत्तो न वेद स्कंदान्यो गंगागर्भसमुद्भव परं स्व
र्गतरंगिण्या महिमानं महामते ५ स्कंद उवा
च संति पुण्यजलानीह सरांसि सरितो मुने
स्थाने स्थाने च तीर्थानि जितात्माध्युषितानि च
६ दृष्टप्रत्ययकारीणि महामहिमभांज्यपि
परं स्वर्गतरंगिण्याः कोट्यंशोपि न तत्र वै ७ अ
नेनैवानुमानेन बुध्यस्व कलशोद्भव दध्रे गं
गोत्तमाङ्गेन देवदेवेन शंभुना ८ स्नानकाले

गं॰स॰ न्यतीर्थेषुजप्यतेजाह्नवीजनैः विनाविष्णुप
२ दींक्वान्यत्समर्थमघशोधने ९ गंगास्नान
फलंब्रह्मन्गंगायामेवलभ्यते यथाद्राक्षाफ
लस्वादोद्राक्षायामेवनान्यतः १० अस्त्युपा
यइहत्वेकः स्याद्येनाविकलंफलं स्नानस्य
देवसरितोमहागुह्यतमोमुने ११ शिवभक्ता
यशांतायविष्णुभक्तिपरायच श्रद्धालवेत्वा २
स्तिकायगर्भवासमुमुक्षवे १२ कथनीयंनचा

न्यस्य कस्यचित्केनचित्क्वचित् इदं रहस्यं पर
मं महापातकनाशनं १३ महाश्रेयस्करं पुण्यं
मनोरथकरं परं द्युनदीप्रीतिजनकं शिवसंतो
षसंतति १४ नाम्नांसहस्रं गंगाया स्तवराजेषु
शोभनं जप्यानांपरमंजप्यं वेदोपनिषदासमं
१५ जपनीयं प्रयत्नेन मौनिनावाचकं विना
शुचिस्थानेषुशुचिना सुस्पष्टाक्षरमेवच अ
ध्यायांतरे गंगाध्यानं विष्णुरुवाच तस्याः

गं० स० स्वरूपं वक्ष्यामि भक्तानां शुभदं परं यद्रूप
२ ध्यानतः पुंभिराषण्मासं त्रिसंध्यतः १७
प्रत्यक्षरूपिणी देवी दृश्यते मणिकर्णिका
चतुर्भुजा विशालाक्षी स्फुरद्वासुरलोचना
१८ पश्चिमाभिमुखी नित्यं प्रबद्धकरसंपु
टा इंदीवरवतीं मालां दधती दक्षिणे करे १९
वरोद्यते करे सव्ये मातुलिंगफलं शुभं कुमा २
ररूपिणी नित्यं नित्यं द्वादशवार्षिकी शुद्ध
२०

स्फटिककांतिश्चसुनीलस्निग्धमूर्धजा जि
तप्रवालमाणिक्यरमणीयरदच्छदा २१ प्र
त्यग्रकेतकीपुष्पलसद्धम्मिल्लमस्तका सर्वां
गमुक्ताभरणा चंद्रकांत्यंशुकावृता २२ पुंडरीक
मयीं मालां सश्रीकां बिभ्रतीहृदि ध्यातव्याने
नरूपेण मुमुक्षुभिरहर्निशं २३ निर्वाणलक्ष्मी
भवनेश्रीमतीमणिकर्णिका मंत्रंतस्याश्चव
क्ष्यामिभक्तकल्पद्रुमाभिधं २४ यस्यावर्त्तन

गं०स० लः सिध्येदपि सिध्यत्येवं नृणां ॐ ऐं ह्रीं श्रीं
४ क्लीं मं मणिकर्णिकायै नमः स्कंद उवाच
ॐ नमो गंगादेव्यै ॐकाररूपिण्यजरातु
लानंतामृतस्रवा अत्युदाराभयाशोकालक
नंदामृतामला १ अथैनो वत्सलामोघापांयो
निरमृतप्रदा अव्यक्तलक्षणाक्षोभ्यानवछि
न्नापराजिता २ अनाथनाथाभीष्टार्थसिद्धि ४
दानंगवर्द्धिनी अणिमादिगुणाधाराग्रगण्या

लीकहारिणी ३ अचिंत्यशक्तिरनघाद्भुतरू
पाघहारिणी अद्रिराजसुताष्टांगयोगसिद्धि
प्रदाच्युता ४ अक्षुण्णशक्तिरसुदानंततीर्था
मृतोदका अनंतमहिमापारानंतसौख्यप्रदा
न्नदा ५ अशेषदेवतामूर्तिरघोरामृतरूपिणी
अविद्याजालशमनीह्यप्रतर्क्यगतिप्रदा ६
अशेषविघ्नसंहर्त्रीत्वशेषगुणगुंफिता अज्ञान
तिमिरज्योतिरनुग्रहपरायणा ७ अभिरामा

नवद्यांग्यनंतसाराकलंकिनी आरोग्यदा
नंदवल्लीत्यापन्नार्त्तिविनाशिनी ८ आश्च
र्यमूर्त्तिरायुष्याह्याढ्याद्याप्रार्यसेविता।
आप्यायिन्याप्तविद्याख्यात्वानंदाश्वासदा
यिनी ९ आलस्यघ्न्यापदांहंत्रीह्यानंदामृ
तवर्षिणी इरावतीष्टदात्रीष्टात्विष्टापूर्त
फलप्रदा १० इतिहासश्रुतीड्यार्थात्वि
हामुत्रशुभप्रदा इज्याशीलसमिज्येष्ठात्विं

ड्रादिपूर्विवंदिता ११ इलालंकारमालेन्द्रातिं
दिराम्यैरंमंदिरा इंदिंदिरादिसंसेव्यात्वीश्व
रीश्वरवल्लभा १२ ईतिभीतिहरेड्याचर्लीड
नीयचरित्रभृत् उत्कृष्टशक्तिरुत्कृष्टोडुपमं
उल्चारिणी १३ उदितांबरमार्गोस्त्रोरगलो
कविहारिणी उक्षोर्वरोत्पलोत्कुंभाचोपेंद्र
चरणाद्भवा १४ उदन्वत्पूर्तिहेतुश्चोदारो
त्साहप्रवर्द्धिनी उद्वेगघ्नोष्णशमनी ह्युष्ण

रश्मिसुताप्रिया १५ उत्पत्तिस्थितिसंहारका
रिण्युपरिचारिणी ऊर्जवहंत्यूर्जधरोर्जाव
तीचोर्मिमालिनी १६ ऊर्ध्वरेतःप्रियोर्ध्वाध्वा
ह्यूर्मिलोर्ध्वगतिप्रदा ऋषिवृंदस्तुतर्द्धिश्च
ऋणत्रयविनाशिनी १७ ऋतंभरर्द्धिदात्री
चऋक्स्वरूपा ऋजुप्रिया ऋक्षमार्गवहर्क्षा
र्चिर्ऋजुमार्गप्रदर्शिनी १८ एधिताखिलध ६
र्मार्थात्वेकैकामृतदायिनी एधनीयस्वभावे

ज्यात्वेजिताशेषपातका १९ ऐश्वर्यदैश्वर्य
रूपाह्यैतिह्याह्येदवीद्युतिः ओजस्विन्योष
धीक्षेत्रमोजोदौदनदायिनी २० ओष्ठामृतौन्न
त्यदात्रीत्वौषधंभवरोगिणां औदार्यचंचुरौ
पैंद्रीत्वौग्रीह्यौमेयरूपिणी २१ अंबराध्वव
हांबष्ठांबरमालांबुजेक्षणा अंबिकांबुम
हायोनिरंधोदांधकहारिणी २२ अंशुमाला
ह्यंशुमतीत्वंगीकृतषडानना अंधतामिस्रहं

गं० स० त्र्यंधुरंजनाख्यंजनावती २३ कल्याणकारि
७ णीकाम्याकमलोत्पलगंधिनी कुमुद्वतीकम
लिनीकांतिः कल्पितदायिनी २४ कांचनाक्षी
कामधेनुःकीर्तिकृत्क्लेशनाशिनी क्रतुश्रेष्ठा
क्रतुफलाकर्मबंधविभेदिनी २५ कमला
क्षीक्लमहराकृशानुतपनद्युतिः करुणार्द्रा
चकल्याणीकलिकल्मषनाशिनी २६ काम ७
रूपाक्रियाशक्तिःकमलोत्पलमालिनी कू

टस्था करुणाकांता कूर्मयाना कलावती २७
कमला कल्पलतिका काली कलुषवैरिणी
कमनीयजला कम्रा कपर्दिसुकपर्दगा २८
कालकूटप्रशमनी कदंबकुसुमप्रिया कालिं
दीकेलिललिता कलकल्लोलमालिका २९ क्रां
तलोकत्रया कंडूः कंडूतनयवत्सला खड्गि
नी खड्गधाराभा खगा खंडेंदुधारिणी ३०
खेखेलगामिनी खस्था खंडेंदुतिलकप्रिया

गं०स० खेचरी खेचरीवंद्या ख्यातिः ख्यातिप्रदायि
८ नी ३१ खंडिप्रणता घोघा खलबुद्धिवि
नाशिनी खातैनःकंदसंदोहा खड्गखट्वांग
खेटिनी ३२ खरसंतापशमनी खनिःपीयू
षपाथसां गंगा गंधवती गौरी गंधर्वनगर
प्रिया ३३ गंभीरांगी गुणमयी गतातंका ग
तिप्रिया गणनाथांबिका गीता गद्यपद्यप ९
रिष्टुता ३४ गांधारी गर्भशमनी गतिभ्रष्ट

गतिप्रदा गोमतीगुह्यविद्यागौर्गोप्त्रीगगन
गामिनी ३५ गोत्रप्रवर्द्धिनीगुण्यागुणातीता
गुणाग्रणीः गुहांबिकागिरिसुतागोविंदांघ्रि
समुद्भवा ३६ गुणनीयचरित्राचगायत्रीगि
रिशप्रिया गूढरूपागुणवतीगुर्वीगौरवव
र्द्धिनी ३७ ग्रहपीडाहरागुंद्रागरघ्नीगानवत्स
ला घर्महंत्रीघृतवतीघृततुष्टिप्रदायिनी
३८ घंटारवप्रियाघोराघौघविध्वंसकारि

गं०स० पी घ्राणतुष्टिकरी घोषा घनानंदा घनप्रिया
९
३९ घातुका घूर्णितजला घृष्टपातकसंत
तिः घटकोटिप्रपीतापा घटिताशेषमंग
ला ४० घृणावती घृणिनिधिर्घस्मरा घू
कनादिनी घुसृणापिंजरतनुर्घर्घरा घर्घ
रस्वना ४१ चंद्रिका चंद्रकांतांबुश्वंचला
पाचलद्युतिः चिन्मयी चितिरूपा च चंद्रा ९
युतशतानना ४२ चांपेयलोचना चारुश्चा

वेंगी चारुगामिनी चार्या चारित्रनिलया चि
त्ररुच्चित्ररूपिणी ५३ चंपूर्श्वंदनस्तुच्यंबु
श्चर्चनीया चिरस्थिरा चारुचंपकमालाढ्या
चमिताशेषदुष्कृता ५४ चिदाकाशवहा
चिंत्या चंचच्चामरवीजिता चोरितानेकवृजि
नाचरिताशेषमंडला ५५ छेदिताखिलपा
पौघा छद्मघ्नी छलहारिणी छन्नत्रिविष्टप
तला छेदिताशेषबंधना ५६ छुरितामृत

धारैघाछातैनाम्भ्कंदगामिनी। छत्रीकृतम
रालौघाछत्रीकृतनिजामृता ५७ जाह्नवी
ज्याजगन्माताजप्याजंघालवीचिका जया
जनार्दनप्रीताजुषणीयाजगद्धिता ४८ जी
वनंजीवनप्राणाजगज्ज्येष्ठाजगन्मयी जी
वजीवातुलतिकाजन्मिजन्मनिबर्हिणी ४९
जाड्यविध्वंसनकरीजगद्योनिर्जलाविला १०
जगदानंदजननीजलजाजलजेक्षणा ५०

जनलोचनपीयूषाजटातरविहारिणी ज
यंतीजंजपूकघ्नीजनितज्ञानविग्रहा ५१
झल्लरीवाद्यकुशलाझलझ्झालजलावृता
झिंटीशवंद्याझांकारकारिणीझर्झरावती
५२ टीकिताशेषपातालाटंकिकैनोद्धिपाटने
टंकारनृत्यत्कल्लोलाटीकनीयमहातटा ५३
डंबरप्रवहाडीनराजहंसकुलाकुला डमरु
मरुहस्ताचडामरोक्तमहांडका ५४ ढौकि

ताशेषनिर्वाणाढक्कानादचलज्जला ढुंढि
विघ्नेशजननी ढणढ्ढुणितपातका ५५ तर्प
णीतीर्थतीर्थाच त्रिपथा त्रिदशेश्वरी त्रिलो
कगोप्त्रीतोयेशी त्रैलोक्यपरिवंदिता ५६
तापत्रितयसंहर्त्री तेजोबलविवर्द्धिनी त्रि
लक्ष्यातारिणीतारातारापतिकरार्चिता ५७
त्रैलोक्यपावनीपुण्यातुष्टिदातुष्टिरूपिणी
तृष्णाछेत्त्रीतीर्थमातात्रिविक्रमपदोद्भवा ५८

तपोमयी तपोरूपा तपस्तोमफलप्रदा त्रैलो
क्यव्यापिनी तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ५९
त्रैलोक्यसुंदरी तुर्या तुर्यातीतपदप्रदा त्रैलोक्य
लक्ष्मीस्त्रिपदी तथ्या तिमिरचंद्रिका ६० ते
जोगर्भा तपस्सारा त्रिपुरारिशिरोगृहा त्रयी
स्वरूपिणी तन्वी तपनांगजभीतिनुत् ६१ त
रिस्तरणिजामित्रं तर्पिताशेषपूर्वजा तुलावि
रहिता तीव्रपापतूलतनूनपात् ६२ दारिद्र्य

गं०स० १२ दमनीदक्षादुष्प्रेक्ष्यादिव्यमंडना दीक्षावती
दुरावाप्याद्राक्षामधुरवारिभृत् ६३ दर्शिता
नेककुतुकादुष्टदुर्जयदुःखहृत् दैन्यहृद्दु
रितघ्नीचदानवारिपदाब्जजा ६४ दंदशू
कविषघ्नीचदारिताघौघसंततिः द्रुतादेव
द्रुमच्छन्नादुर्वाराघविनाशिनी ६५ दमग्रा
ह्यादेवमातादेवलोकप्रदर्शिनी देवदेवप्रि १२
यादेवी दिक्पालपददायिनी ६६ दीर्घायुः

कारिणी दीर्घा दोग्ध्री दूषणवर्जिता दुग्धां
बुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ६७
द्युनदी दीनशरणं देहिदेह निवारिणी द्राघीय
सी दाहहंत्री दितपातकसंततिः ६८ दूरदेशां
तरचरी दुर्गमा देववल्लभा दुर्वृत्तघ्नी दुर्विगा
ह्या दयाधारा दयावती ६९ दुरासदा दानशीला
द्राविणी द्रुहिणस्तुता दैत्यदानवसंशुद्धिक
र्त्री दुर्बुद्धिहारिणी ७० दानसारा दयासारा

गं०स० द्यावाभूमिविगाहिनी दृष्टादृष्टफलप्राप्ति
१२ र्देवतावृंदवंदिता ७१ दीर्घव्रता दीर्घदृष्टिर्दी
प्ततोया दुरालभा दंडयित्री दंडनीति र्दुष्टदंड
धरार्चिता ७२ दुरोदरघ्नी दावार्चि र्द्रवद्द्रव्यै
कशेवधिः दीनसंतापशमनी दात्री दवथुवैरि
णी ७३ दरीविदारणपरा दांता दांतजनप्रिया
दारिताद्रितटा दुर्गा दुर्गारण्यप्रचारिणी ७४ १२
धर्मद्रवा धर्मधुरा धेनु र्धीरा धृति र्ध्रुवा धेनु

दान फलस्पर्शा धर्मकामार्थमोक्षदा ७५ धर्मो
र्मिवाहिनी धुर्या धात्री धात्रीविभूषणा धर्मि
णीधर्मशीलाच धन्विकोटिकृतावना ७६ ध्या
तपापहराध्येया धावनीधूतकल्मषा धर्मधा
राधर्मसारा धनदा धनवर्धिनी ७७ धर्माधर्म
गुणच्छेत्री धत्तूरकुसुमप्रिया धर्मेशीधर्मशा
स्त्रज्ञा धनधान्यसमृद्धिकृत् ७८ धर्मलभ्याध
र्मजला धर्मप्रसव धर्मिणी ध्यानगम्यस्वरूपा

च धरणी धातृपूजिता ७९ धूर्धूर्जटिजटा
संस्था धन्याधीर्धारणावती नंदानिर्वाणजननी
नंदिनीनुन्नपातका ८० निषिद्ध विघ्ननिचया
निजानंदप्रकाशिनी नभोंगनचरीनूतिर्नम्या
नारायणीनुता ८१ निर्मला निर्मलाख्याना ना
शिनीतापसंपदां नियता नित्यसुखदा नानाश्च
र्यमहानिधिः ८२ नदीनदसरोमाता नायिका
नाकदीर्घिका नष्टोद्धरणधीरा च नंदना नंददा

यिनी ८३ निर्मुक्ताशेषभुवना निःसंगा निरु
पद्रवा निरालंबा निष्प्रपंचा निर्नाशितमहाम
ला ८४ निर्मलज्ञानजननी निःशेषप्राणिताप
हृत् नित्योत्सवा नित्यतृप्ता नमस्कार्या निरंजना ८५
निष्ठावती निरातंका निर्लेपा निश्चलात्मिका नि
रवद्या निरीहा च नीललोहितमूर्धगा ८६ नंदि
भृंगिगणस्तुत्या नागानंदा नगात्मजा निष्प्रत्यू
हा नाकनदी नियार्णवदीर्घनौः ८७ पुण्यप्रदा

गं॰स॰ पुण्यगर्भापुण्यापुण्यतरंगिणी पृथुःपृथुफला
१५ पूर्णाप्रणतार्तिप्रभंजनी ८८ प्राणदाप्राणज
ननीप्राणेशीप्राणरूपिणी पद्मालयापराश
क्तिःपुरजित्परमप्रिया ८९ परापरफलप्राप्तिः
पावनीचपयस्विनी परानंदाप्रकृष्टार्थाप्रति
ष्ठापालनीपरा ९० पुराणपठितापीताप्रण
वाक्षररूपिणी पार्वतीप्रेमसंपन्नापशुपाश १५
विनाशिनी ९१ परमात्मस्वरूपाचपरब्रह्मप्र

काशिनी । परमानंदनिस्पंदा प्रायश्चित्तस्वरूपि
णी ९२ पानीयरूपनिर्वाणा परित्राणपरायणा
पापेंधनदवज्वाला पापारिः पापनामनुत् ९३
परमैश्वर्यजननी प्रज्ञा प्राज्ञा परावरा प्रत्यक्ष
लक्ष्मीः पद्माक्षी परव्योमामृतस्रवा ९४ प्रसं
नरूपा प्रणिधिः पूता प्रत्यक्षदेवता पिनाकि
परमप्रीता परमेष्ठिकमंडलुः ९५ पद्मनाभप
दार्घ्येण प्रसूता पद्ममालिनी परर्द्धिदा पुष्टिक

गं०स० री पथ्यापूर्तिः प्रभावती ९६ पुनाना पीतगर्भ
१६ घ्नी पापपर्वतनाशिनी फलिनी फलहस्ता च फु
ल्लांबुजविलोचना ९७ फालितैनोमहाक्षेत्रा
फणिलोकविभूषणं फेनछलप्रणुन्नैनाः फु
ल्लकैरवगंधिनी ९८ फेनिलाच्छांबुधाराभा
फडुच्चाटितपातका फाणितस्वादुसलिला
फांटपथ्यजलाविला ९९ विश्वमाता च विश्वे १६
शी विश्वा विश्वेश्वरप्रिया ब्रह्मण्या ब्रह्मकृद्ब्रा

ह्रीब्रलिछाविमलोदका १०० विभावरीचवि
रजाविक्रांतानेकविष्टपा विश्वामित्रं विस्नुपदी
वैस्नवीवैस्नवप्रिया १ विरूपाक्षप्रियकरीविभू
तिर्विश्वतोमुखी विपाशावैबुधीविद्यावेदाक्षर
रसम्भवा २ विद्यावेगवतीवंद्यावृंहिणीब्रह्मवा
दिनी वरदाविप्रकृष्टाचवरिष्ठाचविशोधिनी ३
विद्याधरीविशोकाचवयोवृंदनिषेविता बहुद
काबलवतीव्योमस्थाविबुधप्रिया ४ वाणीवे

 द्रवती चित्ता ब्रह्मविद्यातरंगिणी ब्रह्मांडकोटि
 व्याप्तांबु ब्रह्महत्यापहारिणी ५ ब्रह्मेशविष्णु
रूपा च बुद्धिविभववर्द्धिनी विलासिसुखदा
वैश्या व्यापिनी च वृषारणिः ६ वृषांकमौलि
निलया विपन्नार्त्तिप्रभंजिनी विनीता विनता
ब्रध्नतनया विनयान्विता ७ विपंचीवाद्यकु
शला वेणुश्रुतिविचक्षणा। वर्चस्करीबलक
रीबलोन्मूलितकल्मषा ८ विपाप्मा विगता

तंका विकल्पपरिवर्जिता वृष्टिकर्त्री वृष्टिजला
विधिर्विछिन्नबंधना ९ व्रतरूपा वित्तरूपा
बहुविघ्नविनाशकृत् वसुधारावसुमतीविचि
त्रांगी विभावसुः १० विजया विश्वबीजंच वामदे
वीवरप्रदा वृषाश्रिता विषघ्नीच विज्ञानोर्म्यं
सुमालिनी ११ भव्याभोगवतीभद्राभवानी
भूतभावनी भूतधात्रीभयहराभक्तदारिद्र्यघा
तिनी १२ भुक्तिमुक्तिप्रदा भेशी भक्तस्वर्गाप

गं०स० वरदा भागीरथी भानुमती भाग्यं भोगवती भृतिः
१८ १३ भवप्रिया भवद्वेष्ट्री भूतिदा भूतिदक्षिणा
भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः १४
भ्रांतिज्ञानप्रशमनी भिन्नब्रह्मांडमंडपा भूरि
दा भक्तिसुलभा भाग्यवद्दृष्टिगोचरा १५ भंजि
तोपप्लवकुला भक्ष्यभोज्यसुखप्रदा भिक्ष
णीया भिक्षुमाता भावा भावस्वरूपिणी १६ १८
मंदाकिनी महानंदा माता मुक्तितरंगिणी महो

दयामधुमतीमहापुण्यामुदाकरी १७ मुनिस्तु
तामोहहंत्रीमहातीर्थामधुस्रवा माधवीमानि
नीमान्यामनोरथपथातिगा १८ मोक्षदामति
दामुख्यामहाभाग्यजनाश्रिता महावेगवतीमे
ध्यामहामहिमभूषणा १९ महाप्रभावामहती
मीनचंचललोचना महाकारुण्यसंपूर्णामह
र्धिश्चमहोत्पला २० मूर्तिमन्मुक्तिरमणीमणि
माणिक्यभूषणा मुक्ताकलापनेपथ्यामनो

गं०स०
१९

नयननंदिनी २१ महापातकराशिघ्नीमहादे
वार्धहारिणी महोर्मिमालिनीमुक्तामहादेवी
मनोन्मनी २२ महापुण्योदयप्राप्यामायाति
मिरचंडिका महाविद्यामहामायामहामेधा
महौषधं २३ मालाधरीमहोपायामहोरग
विभूषणा महामोहप्रशमनीमहामंगलमं
गलं २४ मार्त्तंडमंडलचरीमहालक्ष्मीर्मदो १९
ज्झिता यशस्विनीयशोदाचयोग्यामुक्तात्मसे

विता २५ योगसिद्धिप्रदायाज्यायज्ञेशपरि
पूजिता यज्ञेशी यज्ञफलदायजनीयायशस्क
री २६ यमिसेव्यायोगयोनिर्योगिनीयुक्तबुद्धि
दा योगज्ञानप्रदायुक्तायमाद्यष्टांगयोगयुक्
२७ यंत्रिताघोघसंचारायमलोकनिवारिणी
यातायातप्रशमनीयातनानामकृंतनी २८
यामिनीशहिमाच्छेदायुगधर्मविवर्जिता रेव
तीरतिकृद्रम्यारत्नगर्भारमारतिः २९ रत्ना

करप्रेमपात्रं रसज्ञा रसरूपिणी रत्नप्रासाद
गर्भा च रमणीयतरंगिणी ३० रत्नार्ची रुद्ररम
णी रागद्वेषविनाशिनी रमारामा रम्यरूपा रो
गिजीवातुरूपिणी ३१ रुचिकृद्रोचनी रम्या रुचि
रा रोगहारिणी राजहंसा रत्नवती राजत्कल्लो
लराजिका ३२ रामणीयकरेखा च रुजारी रोग
शोषिणी राका रंकार्त्तिशमनी रम्या रोलंबरा
विणी ३३ रागिणी रंजितशिवा रूपलावण्यशे
वधिः लोकप्रसूर्लोकवंद्या लोलत्कल्लोलमा

लिनी ३४ लीलावतीलोकभूमिर्लोकिलोचन
चंद्रिका लेखस्त्रवंतीलटभालघुवेगालघुत
हत ३५ लास्यत्तरंगहस्ताचललिताल्यभं
गिगा लोकबंधुर्लोकधात्रीलोकोत्तरगुणोर्जि
ता ३६ लोकत्रयहितालोकालक्ष्मीर्लक्षणल
क्षिता लीलालक्षितनिर्वाणालावण्यामृतव
र्षिणी ३७ वैश्वानरीवासवेड्यावंध्यात्वप
रिहारिणी वासुदेवांघ्रिरेणुघ्नीवज्रिवज्रनिवा
रिणी ३८ शुभावतीशुभफलाशांतिःशंतनुव

शुभा शूलिनी शैशववयाः शीतलामृतवाहिनी
३९ शोभावती शीलवती शोषिताशेषकिल्बि
षा शरण्या शिवदा शिष्टा शरजन्मप्रसूः शिवा
४० शक्तिः शशांकविमला शमनस्वसृसंम
ता शमा शमनमार्गघ्नी शितिकंठमहाप्रिया
४१ शुचिः शुचिकरी शेषा शेषशायिपदोद्भ
वा श्रीनिवासश्रुतिः श्रद्धा श्रीमती श्रीः शुभ
व्रता ४२ शुद्धविद्यासुभावर्ता श्रुतानंदा श्रुति
स्तुतिः शिवेतरघ्नी शबरी शांबरीरूपधारिणी ४३

श्मशानशोधनीशांताशश्वच्छतधृतिस्तुता
शालिनीशालिशोभाढ्याशिखिवाहनगर्भभृ
त् ४४ शंसनीयचरित्राचशातिताशेषपातका
षड्गुणैश्वर्यसंपन्नाषडंगश्रुतिरूपिणी ४५
षंढताहारिसलिलात्स्यायन्नदनदीशता स
रिद्वराचसुरसासुप्रभासुरदीर्घिका ४६ खःसिं
धुःसर्वदुःखघ्नीसर्वव्याधिमहौषधं सेव्यासि
द्धिःसतीसूक्तिःस्कंदसूश्चसरस्वती ४७ संप
त्तरंगिणीस्तुत्यास्थाणुमौलिकृतालया स्थैर्य

गं०स० दासुभगा सौख्या स्त्रीषु सौभाग्यदायिनी
२२ ४८ स्वर्गनिःश्रेणिका सूक्ष्मा स्वधा स्वाहा सु
धाजला समुद्रपूरणी स्वर्ग्या सर्वपातकवैरि
णी ४९ स्मृताघहारिणी सीता संसाराब्धित
रंडिका सौभाग्यसुंदरी संध्या सर्वसारसम
न्विता ५० हरप्रिया हृषीकेशी हंसरूपा हिर
ण्मयी हृताघसंघा हितकृल्लोहेला घगर्वहृ २२
त् ५१ क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी

क्षमा १५२ इतिनामसहस्रं हि गंगायाः क
लशोद्भव कीर्त्तयित्वा नरः सम्यग्गंगास्नानफलं
लभेत् १ सर्वपापप्रशमनं सर्वविघ्नविनाशनं स
र्वस्तोत्रजपाच्छ्रेष्ठं सर्वपावनपावनं २ श्रद्धयाभी
ष्टफलदं चतुर्वर्गसमृद्धिकृत् सकृज्जपादवाप्नो
तिह्येकक्रतुफलं मुने ३ सर्वतीर्थेषु यः स्नातः स
र्वयज्ञेषु दीक्षितः तस्य यत्फलमुद्दिष्टं त्रिकाल
पठनाच्च तत् ४ सर्वव्रतेषु यत्पुण्यं सम्यक्चीर्णे

गं०स० २३ छुवाउव तत्फलं समवाप्नोति त्रिसंध्यं नियतः
पठन् ५ स्नानकाले पठेद्यस्तु यत्र कुत्र जलाश
ये तत्र सन्निहिता नूनं गंगा त्रिपथगा मुने ६
श्रेयोर्थी लभते श्रेयो धनार्थी लभते धनं कामी
कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ७
वर्षं त्रिकालजपनाच्छ्रद्धया शुचिमानसः ऋ
कालाभिगमनादपुत्रः पुत्रवान्भवेत् ८ नाका २३
लमरणं तस्य नाग्निचोराहिंसाध्वसं नाम्नां

सहस्त्रं गंगायायोजपेच्छ्रद्धयामुने ९ गंगाना
मसहस्त्रंतुजप्त्वाग्रामांतरंव्रजन् कार्यसिद्धि
मवाप्नोति निर्विघ्नोगेहमाविशेत् १० तिथिवा
रर्क्षयोगानांनदोषःप्रभवेत्तदा यदाजप्त्वाव्रजे
देतत्स्तोत्रंग्रामांतरंनरः ११ आयुरारोग्यजन
नंसर्वोपद्रवनाशनं सर्वसिद्धिकरंपुंसांगंगाना
मसहस्त्रकं १२ जन्मांतरसहस्त्रेषुयत्पापंसमु
पार्जितं गंगानामसहस्त्रस्यजपनात्तत्क्षयंव्रजेत् १३

ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः
तत्संयोगी भ्रूणहंता मातृहा पितृहा मुने १४
विश्वासघाती गरदः कृतघ्नो मित्रघातकः
अग्निदो गोवधकरो गुरुद्रव्यापहारकः १५
महापातकयुक्तोपि संयुक्तोप्युपपातकैः मुच्य
ते श्रद्धया जप्त्वा गंगानामसहस्रकं १६ आ
दिव्याधिपरिक्षिप्तो घोरतापपरिप्लुतः मुच्य
ते सर्वदुःखेभ्यस्तवस्यास्यानुकीर्तनात् १७

संवत्सरेणयुक्तात्मापठन्भक्तिपरायणः अभी
प्सितांलभेत्सिद्धिंसर्वपापैःप्रमुच्यते १८ संश
याविष्टचित्तस्यधर्मविद्वेषिणोपिच दांभिकस्या
पिहिंस्रस्यचेतोधर्मपरंभवेत् १९ वर्णाश्रमपथी
नस्यकामक्रोधविवर्जितः यत्फलंलभतेज्ञानीत
दाप्नोत्यस्यकीर्तनात् २० गायत्र्ययुतजाप्येनय
त्फलंसमुपार्जितं सकृत्पठनतःसम्यक्तदशेष
मवाप्नुयात् २१ गांदत्वावेदविदुषेयत्पुण्यंलभ

तेकृती तत्पुण्यं सम्यगाख्यानं स्तवराजसकृ
ज्जपात् २२ गुरुंशुश्रूषणं कुर्वन् यावज्जीवं न
रोत्तमः यत्पुण्यमर्जयेद्भक्त्या वर्षैस्त्रिषवणं प
ठन् २३ वेदपारायणात्पुण्यं यदत्र परिपठ्यते
तत्षण्मासेन लभते त्रिसंध्यं परिकीर्तनात् २४
गंगायाः स्तवराजस्य प्रत्यहं परिशीलनात् शि
वभक्तिमवाप्नोति विष्णुभक्तोथवा भवेत् २५ यः
कीर्तयेदनुदिनं गंगानामसहस्रकं तत्समीपेस

हचरीगंगादेवी सदा भवेत् २६ सर्वत्रपूज्योभ
वति सर्वत्रविजयीभवेत् सर्वत्रसुखमाप्नो
तिजाह्नवीस्तोत्रपाठतः २७ सदाचारीसवि
ज्ञेयः सशुचिस्तु सदैवहि कृतसर्वसुरार्चः
सकीर्तयेद्य इमांस्तुतिं २८ तस्मिंस्तुष्टेभवे
त्तुष्टा जाह्नवी नात्रसंशयः तस्मात्सर्वप्रयत्ने
न गंगाभक्तः समर्चयेत् २९ स्तवराजमिमंगां
गंश्रृणुयाद्यश्चवैपठेत् श्रावयेदथतद्भक्ता

गं०स० दंभलोभविवर्जितान् ३० मुच्यतेत्रिविधैःपा
२८ पैर्मनोवाक्कायसंभवैः क्षणान्निःपापतामेति
पितॄणांचप्रियोभवेत् ३१ सर्वदेवप्रियश्चापि
सर्वर्षिगणसेवितः अंतेविमानमारुह्यदिव्य
स्त्रीशतसंवृतः ३२ दिव्याभरणसंपन्नोदिव्य
भोगसमन्वितः नंदनादिवनेस्वैरंदेववत्सप्र
मोदते ३३ भुंजमानेषुविप्रेषुश्राद्धकालेविशे
षतः जपन्निदंमहास्तोत्रंपितॄणांतृप्तिकारकं २८
३४ यावंतितत्रसिक्थानियावंतोंबुकणाःस्थि

ताः तावंत्येवहिवर्षाणिमोदंतेस्वःपितामहाः
३५ यथाप्रीणंतिपितरोगंगायांपिंडदानतः
तथैवतृप्नुयुःश्राद्धेस्तवस्यास्यानुसंश्रयात्
३६ एतत्स्तोत्रंगृहेयस्यलिखितंपरिपूज्यते
तत्रपापभयंनास्तिशुचितद्भवनंसदा ३७
अगस्तेकिंबहूक्तेनश्रृणुमेनिश्चितंवचः संश
योनात्रकर्तव्यःसंदेगघरिफलंनहि ३८ या
वंतिमर्त्येस्तोत्राणिमंत्रजालान्यनेकशः ता

वंतिस्तवराजस्यगांगेयस्यसमानिन ३९ या
वज्जन्मजपेद्यस्तुनाम्नामेतत्सहस्रकं सकीक
टेष्वपिमृतोनपुनर्गर्भमाविशेत् ४० नित्यंनि
यमवानेतद्योजपेत्स्तोत्रमुत्तमं अन्यत्रापिवि
पन्नः सगंगातीरेमृतोभवेत् ४१ एतत्स्तोत्रं
वरंरम्यंपुराप्रोक्तंपिनाकिना विष्णवेनिजभ
क्तायमुक्तिबीजाक्षरास्पदं ४२ गंगास्नान
प्रतिनिधिस्तोत्रमेतन्मयेरितं सिस्नासुर्जा

ह्रवीं तस्मादेतत्स्तोत्रं जपेत्सुधीः ४२ ॥
इति श्रीस्कंदपुराणे काशीखंडे गंगासहस्त्रना
मैकोनत्रिंशोध्यायः श्रीकाशीविश्वेश्वरार्पण
मस्तु ॥ शके १७२३ दुर्मतीनामसंवत्सरेमा
घशुक्लेनवम्यांतद्दिने दाडेकरोपनामकभास्क
रेन लिखितं शुभंभवतु ॥ छ छ छ ॥

गं०स०
२८

॥इतिगंगासहस्रनामस्तोत्रसमाप्त॥



२८